22E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र १ ले**

**विषय: प्रतिमा (22E412)**

**दिनांक :०४/०१/२०२३** **गुण : १००** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १ पञ्च श्लोकानाम् अनुवादं लिखत।** **(२५)**

१) छत्रं सव्यजनं सनन्दिपटहं भद्रासनं कल्पितं न्यस्ता हेममया: सदर्भकुसुमास्तीर्थाम्बुपूर्णा घटा:।।
युक्त: पुष्परथश्च मन्त्रिसहिता: पौरा: समभ्यागता: सर्वस्यास्य हि मङ्गलं स भगवान्वेद्यां वसिष्ठः स्थित:।।

२) वनगमननिवृत्ति: पार्थिवस्यैव तावन्मम पितृपरवत्ता बालभाव: स एव।।
नवनृपतिविमर्शे नास्ति शङ्का प्रजानामथ च न परिभोगैर्वञ्चिता भ्रातरो मे।।

३) मेरूश्चलन्निव युगक्षयसंनिकर्षे शोषं व्रजन्निव महोदधिरप्रमेय:।।
सूर्य: पतन्निव च मण्डलमात्रलक्ष्य:। शोकद् भृशं शिथिलदेहमतिनरेन्द्र:।।

४) हृदय भव सकामं यत्कृते शंकसे त्वं शृणु पितृनिधनं तद् गच्छ धैर्यं च तावत्।
स्पृशति तु यदि नीचो मामयं शुल्कशब्द: त्वथ च भवति सत्यं तत्र देहो विशोध्य:।।

५) कस्यासौ सदृशतर: स्वर: पितुर्मे गाम्भीर्यात् परिभवतीव मेघनादम्।।
य: कुर्वन् मम हृदयस्य बन्धुशङ्कां सस्नेह: श्रुतिपथमिष्टत: प्रविष्ट:।।

६) योऽस्या: कर: श्राम्यति दर्पणेऽपि स नैति खेदं कलशं वहन्त्या:।।
कष्टं वनं स्त्रीजनसौकुमार्यं समं लताभि: कठिनिकरोति।।

७) रेणु: समुत्पतति लोध्रसमानगौर: संप्रावृणोति च दिशः पवनावधूत:।।
शंखध्वनिश्च पटहस्वनधीरनादै: सम्मूर्च्छितो वनमिदं नगरीकरोति।।

**प्र.२ पञ्च वाक्यानां ससन्दर्भं स्पष्टीकुरुत।** **(३०)**

१) वल्कलं कस्मादानीतम्।
२) अल्पं तुल्यशीलानि द्वन्द्वानि सृज्यन्ते।
३) इदानीमपि संदेह: किं क्षमा निर्मनस्विता।
४) कथं कथं रथेन केवलम्।
५) अहो क्रियामाधुर्यं पाषाणानाम्।
६) मम मातुश्च मातुश्च मध्यस्था त्वं न शोभसे।
७) हन्त त्रैलोक्यसाक्षिण: खल्वेत।

**प्र.३ व्यक्तिरेखाद्वयं स्पष्टीकुरुत।** **(२०)**

१) भरतः २) रामः ३) कौसल्या

**प्र.४.** भाससमस्या स्पष्टीकुरुत। **(१५)**

**अथवा**

प्रतिमानाटकस्य चतुर्थांकस्य रसग्रहणं कुरुत।

**प्र.५. टिप्पणीद्वयं लिखत।** **(१०)**

१) नान्दी २) दशरथस्य शोक: ३) प्रतिमाशीर्षकस्य अन्वर्थकता

----------